Suktavali;
Venkateshwar Press. – Mumbai, 1895

25411



# ॥ अथ सूक्तावलिप्रारंभः ॥

न्मनिरर्थकम् ॥ ८ ॥ सुखितस्यदुःखितस्यचसंसारेधर्मएवतवकार्यः ॥ सुखितस्यतदभिवृद्धचै
॥ १ ॥ दुःखभुजस्तदुपघाताय ॥ ९ ॥ इतिधर्मपद्धतिः ॥ ॥ धनोपयोगःसत्पात्रेयस्यैवास्तिसपण्डितः ॥
गुरुशुश्रूषणेचायुःचित्तंसज्ज्ञानचिंतने ॥ १ ॥ प्रष्टव्यागुरवोनित्यंज्ञातमर्थमपिस्वयम् ॥ सतैर्नि
श्चयमानीतो ददातिपरमंसुखम् ॥ २ ॥ प्रत्यक्षेगुरवःस्तुत्याःपरोक्षेमित्रबांधवाः ॥ कर्मांतेदास
भृत्याश्चनचपुत्रानचस्त्रियः ॥ ३ ॥ गुरोरवज्ञयामृत्युर्मंत्रत्यागाद्दरिद्रता ॥ गुरुमंत्रपरित्यागी
सिद्धोपिनरकंव्रजेत् ॥ ४ ॥ दुर्भगोविकलोमूर्खोनिर्विवेकोनपुंसकः ॥ नीचकर्मकरोनीचोगुरु
दूषणकारकः ॥ ५ ॥ गुरुद्रव्यस्यहर्तॄणांतेजोहानिर्दरिद्रता ॥ दुर्मृत्युश्चमहारोगोधनहानिःसदा
भवेत् ॥ ६ ॥ अज्ञानतिमिरांधानांज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवे
नमः ॥ ७ ॥ इतिगुरुपद्धतिः ॥ अष्टमीचगुरुंहन्तिशिष्यंहंतिचतुर्दशी ॥ पंचदश्युभयंहन्ति ॥ १ ॥
प्रतिपत्सुनचिंतयेत् ॥ १ ॥ आहारोमैथुनंनिद्रास्वाध्यायेषुप्रवर्तनम् ॥ चत्वारिखलुकर्माणि

सन्ध्याकालेषुवर्जयेत् ॥ २ ॥ विद्याशिल्पमनालस्यंपांडित्यंमित्रसंग्रहः ॥ अचोरहरणीयाश्च
पंचैतेनिधयोऽक्षयाः ॥ ३ ॥ विद्यानामनरस्यरूपमतुलंप्रच्छन्नगुप्तंधनं विद्याभोगकरीयशस्सुख
करीविद्यागुरूणांगुरुः ॥ विद्याबन्धुजनोविदेशगमनेविद्यापरंदैवतंविद्याराजसुपूज्यतेनहिधनं
विद्याविहीनःपशुः ॥ ४ ॥ आहारनिद्राभयमैथुनंच सामान्यमेतत्पशुभिर्नराणाम् ॥ ज्ञानं
नराणामधिकोविशेषोज्ञानेनहीना पशुभिःसमानाः ॥ ५ ॥ येषांनविद्यानतपोनदानंनचापिशीलं
नगुणोनधर्मः ॥ तेमर्त्यलोकेभुविभारभूतामनुष्यरूपेणमृगाश्चरंति ॥ ६ ॥ स्वरेशिरोजनेमांसं
त्वचंचब्रह्मचारिणे ॥ शृंगंहियोगिनीदद्यान्मृगःस्त्रीषुसुलोचनम् ॥ ७ ॥ स्वगृहेपूज्यतेमूर्खःस्वग्रा
मेपूज्यतेप्रभुः ॥ स्वदेशेपूज्यतेराजाविद्वान्सर्वत्रपूज्यते ॥ ८ ॥ गुणान्दोषानशास्त्रज्ञःकथंवि
भजतेजनः ॥ किमंधस्याधिकारोस्तिरूपभेदोपलब्धिषु ॥ ९ ॥ अप्येकाक्षरदातारंयोगुरुंनाभि
मन्यते ॥ शुनांयोनिशतंगत्वाचांडालेष्वनुजायते ॥१०॥ अज्ञानतिमिरांधानांज्ञानांजनशला

कया ॥ नेत्रमुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥ ११॥आचार्यपुस्तकसहायनिवासवित्तंवाह्याश्चपंच
पठनंपरिवर्धयन्ति ॥ आरोग्यबुद्धिविनयोद्यमशास्त्ररागः पंचांतराःपठनसिद्धिकराभवंति॥ १२॥
गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा ॥ अथवाविद्ययाविद्याचतुर्थनैवविद्यते ॥ १३ ॥ अलसोमंदबु
द्धिश्चसुखीचव्याधिपीडितः ॥ निद्रालुःकामुकश्चैवषड्विद्यानाधिकारिणः ॥१४॥ रूपयौवनसंपन्ना
विशालकुलसंभवाः ॥ विद्याहीनानशोभंतेनिर्गंधाइवकिंशुकाः॥ १५॥यद्यपिभवतिकुरूपोवस्त्राल‌ं
कारवेषपरिहीनः॥ सज्जनसभांप्रविष्टोराजतिविद्याधिकःपुरुषः ॥१६॥ अनधीतशब्दशास्त्रोयोन्य
च्छास्त्रंसमीहतेवक्तुम्॥ सोहंःपदानिगणयतिनिशितमसिजलेचिरगतस्य॥ १७॥अनभ्यासेविषंशा
स्त्रमजीर्णेभोजनंविषम् ॥ विषंगोष्ठीदरिद्रस्यवृद्धस्यतरुणीविषम् ॥१८॥ वरंपर्वतदुर्गेषुभ्रमोवनच
रैःसह ॥ नमूर्खजनसंसर्गःसुरेंद्रभुवनेष्वपि ॥ १९ ॥ मातेवरक्षतिपितेवहितेनियुंक्तेकांतेवचाभि
रमयत्यभिहंतिशोकम् ॥ विद्याकरोतिनिखिलंखलुबंधुकार्यंसौख्यंचकीर्तिमतुलांगुरुतांचलोके॥

श्रीगणेशाय नमः ॥ ॥ अथ सूक्तावलिः ॥ ॥ धर्मः सर्वसुखाकरोहितकरोधर्मंबुधाश्चिन्वतेधर्मेणैव
समाप्यतेशिवसुखंधर्मायतस्मैनमः ॥ धर्मान्नास्तिपरःसुहृद्भवभृतांधर्मस्यतत्त्वंपरं धर्मेचित्तमहं
दधेसुमनसाहेधर्ममांपालय ॥ १ ॥ धर्मस्यतस्यलिंगानिदयाक्षांतिरहिंसनम् ॥ तपोदानंचशी
लंचसत्यंशौचंवितृष्णता ॥ २ ॥ सत्यादुत्पद्यतेधर्मोदयादानादिवर्द्धते ॥ क्षमयातिष्ठतेधर्मः
क्रोधाद्धर्मोविनश्यति ॥ ३ ॥ राज्यंचसंपदाभोगाः कुलेजन्मसुरूपता ॥ पांडित्यमायुरारोग्यं
धर्मस्यैतत्फलंविदुः ॥ ४ ॥ धर्मेरागःश्रुतेश्चिंतादानेव्यसनमुत्तमम् ॥ इन्द्रियार्थेषुवैराग्यं सं
प्राप्तंजन्मनःफलम् ॥ ५ ॥ यथाचंद्रंविनारात्रिः कमलेनसरोवरम् ॥ तथानशोभतेजीवो विनाध
र्मेणसर्वथा ॥ ६ ॥ क्षांत्यासमंतपोनास्ति संतोषान्नापरंसुखम् ॥ नास्तिविद्यासमंदानंनास्ति
धर्मोदयापरः ॥ ७ ॥ धर्मार्थकाममोक्षाणांयस्यैकोपिनजायते ॥ अजागलस्तनस्येवतस्यज

१ भवः क्षेमेच संसारे सत्तायां प्राप्तिजन्मनोः ।

॥ ३ ॥

सत्पुत्रेणकुलंनृपेणवसुधालोकत्रयंधार्मिकैः ॥ ३ ॥ अद्भिःशुध्यंतिगात्राणिमनःसत्येनशुध्यति ॥
अहिंसयाचपूतात्माबुद्धिर्ज्ञानेनशुध्यति ॥४॥ जलस्नानंव्रतस्नानंमंत्रस्नानंतथैवच ॥ जलस्नानं
गृहस्थानांव्रतमंत्रौतपस्विनाम् ॥ ५ ॥ चित्तमंतर्गतंदुष्टंतीर्थस्नानैर्नशुध्यति ॥ शतशोपिजलै
र्धौतंमद्यभांडमिवाशुचि ॥ ६ ॥ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंपिबेज्जलम् ॥ सत्यपूतंवदेद्वाक्यंमनः
पूतंसमाचरेत् ॥ ७ ॥ जलेनजनितंपंकंजलेनपरिशुध्यति ॥ चित्तेनजायतेपापंचित्तेनप
रिशुध्यति ॥ ८ ॥ सत्यंतीर्थंतपस्तीर्थंतीर्थमिन्द्रियनिग्रहः ॥ सर्वजीवदयातीर्थमेतत्तीर्थस्यलक्ष
णम् ॥ ९ ॥ इति ज्ञानपद्धतिः ॥ गौरवंप्राप्यतेदानान्नतुद्रव्यस्यसंग्रहात् ॥ स्थितिरुच्चैः
पयोदानांपयोधीनामधःपुनः ॥ १ ॥ एकंवापीजलंयद्वदिक्षौमधुरतांव्रजेत् ॥ निंबेकटुकतां
तद्वत्पात्रापात्रेतुभोजनम् ॥ २ ॥ सत्पात्रोपगतंदानंसुक्षेत्रेह्युत्पबीजवत् ॥ कुपात्रोपगतं ॥ ३ ॥
दानंकुक्षेत्रेह्युत्पबीजवत् ॥ ३ ॥ तद्भोजनंयन्मुनिभुक्तशेषंसबुद्धिमान्योनकरोतिपापम् ॥

तत्सौहृदंयत्क्रियतेपरोक्षंदंभैर्विनायःक्रियतेसधर्मः ॥ ४ ॥ मातृवत्परदारांश्चपरद्रव्याणिलो
ष्ठवत् ॥ आत्मवत्सर्वसत्त्वानियःपश्यतिसपंडितः ॥ ५ ॥ यदिवहासिसुदंडंनग्नमुंडंजटांवा
यदिवससिगुहायांवृक्षमूलेशिलायाम् ॥ यदिपठसिपुराणंवेदसिद्धांततत्त्वंयदिहृदयमशुद्धंसर्व
मेनद्धधास्यात् ॥ ६ ॥इति विचारपद्धतिः ॥कवित्वमारोग्यमतीवमेधास्त्रीणांप्रियत्वंकनकस्यला
भः ॥ स्वप्नेषुतथ्यंस्वजनेषुपूजास्वर्गाच्युतानांकिलचिह्नमेतत् ॥ १ ॥ स्वर्गागतानामिहजीव
लोकेचत्वारिनित्यंहृदयेचसंति ॥ दानप्रसंगोमधुराचवाणीदेवार्चनंधार्मिकतर्पणंच ॥ २ ॥
नातिलोभोविनीतश्चदयादानरुचिर्मृदुः ॥ प्रसन्नवदनश्चैवमनुष्यादागतोनरः ॥ ३ ॥ बह्वाशी
नैवसंतुष्टोमायावीचक्षुधाधिकः ॥ स्वपन्मूढोलसश्चैवतिर्यग्योन्यागतोनरः ॥ ४ ॥ विरोधिता
बंधुजनेषुनित्यंसरोगतामूर्खजनेषुसंगः ॥ अतीवरोषीकटुकाचवाणीनरस्यचिह्नंनरकागतस्य
॥ ५ ॥ इति चतुर्गतिपद्धतिः ॥ नमंत्रानतपोदाननंमित्राणिनबांधवाः ॥ शक्नुवंतिपरित्रातुंनरं

कालेनपीडितम् ॥१॥ स्वयंकर्मकरोत्यात्मास्वयंतत्फलमश्नुते ॥ स्वयंभ्रमतिसंसारेस्वयंमोक्षंच गच्छति ॥ २ ॥ सुखेनवर्धतेकर्मतद्विपाकोहिदुस्तरः ॥ हसंतीधारयेद्गर्भंरुदतीपरिमुंचति ॥ ३ ॥ मिथ्याभावनयादुःखंसत्यभावनयासुखम् ॥ ज्ञानभावनयाकर्मनश्यत्येवनसंशयः ॥ ४ ॥ दानं दरिद्रस्यविभोःप्रशांतिःपूजातपोज्ञानवतांचमौनम् ॥ इच्छानिवृत्तिश्चसुखोषितानांदयाचभूते षुदिवंनयंति ॥ ५ ॥ प्रियवाक्यप्रदानेनसर्वेतुष्यंतिजंतवः ॥ तस्मात्तदेववक्तव्यंवचनेकादरि द्रता ॥ ६ ॥ अवसरपठितंसर्वंसुभाषितत्वंप्रयातियत्किंचित् ॥ वामप्रमाणकालेखरनिनदोमङ्ग लोभवति ॥ ७ ॥ कोतिभारःसमर्थानांकिंदूरंव्यवसायिनाम् ॥ कोविदेशःसुविद्यानांकः परःप्रियवादिनाम् ॥ ८ ॥ सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियम् ॥ प्रियंचनानृतंब्रूयादेषध र्मःसनातनः ॥ ९ ॥ उदयतियदिभानुःपश्चिमेदिग्विभागेप्रचलतियदिमेरुःशीततांयातिवह्निः ॥ प्रभवतियदिपद्मंपर्वताग्रेशिलायांभवतिनपुनरुक्तंभाषितंसज्जनानाम् ॥ १० ॥ बुद्धेःफलंतत्त्व

॥ २० ॥ सहस्रगुणिताविद्याशतशःपरिकीर्त्तिता॥ आगच्छत्येवजिह्वाग्रेस्थानंनिम्नमिवोदकम्॥
॥ २१ ॥ मदोपशमनंशास्त्रंखलानांकुरुतेमदम्॥चक्षुःसंस्कारजंतेजउलूकानामिवांधताम्॥२२॥
ज्ञानंमददर्पहरंमाद्यातियस्तेनतस्यकोवैद्यः॥अमृतंयस्यविषायातितस्याचिकित्साकथंक्रियते २३
केयूराणिनभूषंयतिपुरुषंहारानचंद्रप्रभानस्नानंनविलेपनंनकुसुमंनाकुंचितामूर्द्धजाः ॥ एका
वाणिरलंकरोतिपुरुषंयासंस्कृताधार्यतेक्षीयंतेखिलभूषणानिसततंवाग्भूषणंभूषणम् ॥ २४ ॥
॥ इति विद्यापद्धतिः ॥ ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमोज्ञानस्योपशमः श्रुत
स्यविनयोवित्तस्यपात्रेव्ययः॥अक्रोधस्तपसःक्षमाप्रभवतोधर्मस्यनिर्व्याच्यतासर्वेषामपिसर्वकाल
सुभगंशीलंवरंभूषणम् ॥ १ ॥ जवोहिसप्तेःपरमंविभूषणंत्रपाङ्गनानांःकृशतातपस्विनः॥द्विजस्य
विद्यैवमुनेरपिक्षमापराक्रमंशस्त्रबलोपजीविनाम्॥ २ ॥ नागोभातिमदेनकंजलरुहैःपूर्णेन्दुनाश
र्वरीशीलेनप्रमदाजवेनतुरगोनित्योत्सवैर्मंदिरम् ॥ वाणीव्याकरणेनहंसमिथुनैर्नद्यःसभापंडितैः

तगमनंमहापुरुषलक्षणम् ॥ ९ ॥ उत्तमंस्वार्जितंद्रव्यंपितुर्वित्तंतुमध्यमम् ॥ अधमंमातृवि
त्तंस्यात्स्त्रीवित्तमधमाधमम्ः ॥ १० ॥ अर्थस्योपार्जनेदुःखमार्जितस्यापिरक्षणे ॥ नाशेदुःखं
व्ययेदुःखंधिगर्थंदुःखभाजनम् ॥ ११ ॥ अविश्वासविधानायमहापातकहेतवे ॥ पितापुत्रविं
रोधायहिरण्यायनमोस्तुते ॥ १२ ॥ यौवनंधनसंपत्तिःप्रभुत्वमविवेकता ॥ एकैकमप्यनर्थाय
किंपुनस्तच्चतुष्टयम् ॥ १३ ॥ इत्युद्यमपद्धतिः ॥ पिबंतिनद्यःस्वयमेवनांभःखादंतिनस्वादुफला
निवृक्षाः ॥ अदंतिसस्यंनपयोधराश्चपरोपकारायसतांविभूतयः ॥ १ ॥ चत्वारोवित्तदायादाधर्म
चौराग्निभूभुजः ॥ ज्येष्ठेपमानितेपुंसित्रयःकुप्यन्तिसोदराः ॥ २ ॥ उपार्जितानामर्थानांत्याग
एवहिरक्षणम् ॥ तडागोदरसंस्थानांपरीवाहइवांभसाम् ॥ ३ ॥ यस्यदानविहीनस्यधनान्या
यांतियांतिकिम् ॥ आरण्यकुसुमानीवनिरर्थास्तस्यसंपदः ॥ ४ ॥ त्यागोगुणोगुणशतादधिको
मतोमेविद्याविभूषयतितंयादिकिंब्रवीमि ॥ शौर्यंहिनामयदितत्रनमोस्तुतस्मैतच्चत्रयंनचमदोस्ति

विचित्रमेतत् ॥ ५ ॥ अगाधेनापिकिंतेनतोयेनलवणांबुधेः ॥ अणुमात्रंनयद्वारितृष्णाच्छेदक
रंनृणाम् ॥ ६ ॥ सागरकासारोयंनचगंभीरोनचापिरत्नखनिः ॥ तदपिपिपासितपांथश्रमशमन
मनातुरंकुरुते ॥ ७ ॥ इत्यौदार्यपद्धतिः ॥ कुचेलिनंदंतमलावधारिणंबह्वाशिनंनित्यकठोर
भाषिणम् ॥ सूर्योदयेचास्तमयेचशायिनं विमुंचतिश्रीरपिचक्रपाणिनम् ॥ १ ॥ परान्नंपर
वस्त्रंचपरशय्यापरस्त्रियः ॥ परवेश्मनिवासश्चशक्रस्यापिश्रियंहरेत् ॥ २ ॥ क्षुधासमंनास्ति
शरीरपीडनं चिंतासमंनास्तिशरीरशोषणम् ॥ विद्यासमंनास्तिशरीरभूषणं क्षमासमंनास्ति
शरीररक्षणम् ॥ ३ ॥ क्षुधातुराणांनगतिर्नबुद्धिश्चिंतातुराणांनसुखंननिद्रा ॥ कामातुराणांन
भयंनलज्जाद्रव्यातुराणांनगुरुर्नबन्धुः ॥४॥ क्रोधोमूलमनर्थानांक्रोधःसंसारवर्द्धनः ॥ धर्मक्षयकरः
क्रोधस्तस्मात्क्रोधंविवर्जयेत् ॥ ५ ॥ क्रोधस्यकालकूटस्यविद्यतेमहदंतरम् ॥ स्वाश्रयंदहतिक्रो
धः कालकूटोनचाश्रयम् ॥ ६ ॥ क्रोधात्प्रीतिविनाशःस्यान्मानाद्विनयसंहतिः ॥ माययाप्रत्य

योच्छित्तिर्लोभात्सर्वगुणक्षयः ॥ ७ ॥ नकिंचित्कस्यचिन्मित्रंनकिंचित्कस्यचिद्रिपुः ॥ दे
हिनांगुणदोषाःस्युर्मित्राणिरिपवस्तथा ॥ ८ ॥ अनुचितकर्मारम्भःस्वजनविरोधोबलीयसास्प
र्द्धा ॥ प्रमदाजनविश्वासोमृत्युद्वाराणिचत्वारि ॥ ९ ॥ इति श्रीनाशकक्रोधपद्धतिः ॥ देहस्या
भरणंरूपंरूपस्याभरणंगुणः ॥ गुणस्याभरणंज्ञानंज्ञानस्याभरणंक्षमा ॥ १ ॥ मूर्खस्यहिबलं
मौनंतस्करस्यानृतंबलम् ॥ दुर्बलस्यबलंराजाबालानांरोदनंबलम् ॥ २ ॥ गर्वनोद्वहतेनविंद
तिपरंनोभाषतेनिष्ठुरं श्रुत्वाकाव्यमलक्षणंपरकृतंसंतिष्ठतेमूकवत् ॥ उक्तंकेनचिदप्यसत्तुस
हते क्रोधंचनालम्बते दोषांश्छादयतेप्रियंप्रकुरुते चैतत्सतांलक्षणम् ॥ ३ ॥ सुजनोनयातिविकृ
तिंपरहितनिरतोविनाशकालेपि ॥ छेदेपिचन्दनतरुः सुरभयतिमुखंकुठारस्य ॥ ४ ॥ मार्ज्यमा
नःसदायद्वद्दर्पणोनिर्मलोभवेत् ॥ ज्ञानाभ्यासात्तथापुंसांबुद्धिर्भवतिनिर्मला ॥ ५ ॥ पद्मस्य
चयथातोये पत्रंतस्यनलिप्यते ॥ शब्दादिविषयान्भुंजंस्तद्वज्ज्ञानीनलिप्यते ॥ ६ ॥ नदुःखंद

॥ ६ ॥

विचारणंचदेहस्यकार्यंव्रतधारणंच ॥ वित्तस्यकार्यंखलुपात्रदानंवाचःफलंप्रीणनंस्याराज्ञणाम्
॥ ११ ॥ इतिवाक्यपद्धतिः ॥ उद्योगसारिणीलक्ष्मीःकीर्तिस्त्यागानुसारिणी ॥ अभ्या
ससारिणीविद्याबुद्धिःकर्मानुसारिणी ॥ १ ॥ उद्योगःकलहःकंडूर्द्यूतंमद्यंपरस्त्रियः ॥ आहारं
मैथुनंनिद्रासेव्यमानंतुवर्धते ॥ २ ॥ उद्योगःशत्रुवन्मित्रमालस्यंमित्रवद्रिषम् ॥ विषवच्चामृतं
विद्यासुधावद्विषमंगना ॥ ३ ॥ नदैवमितिसंचिंत्यत्यजेदुद्योगमात्मनः ॥ अनुद्योगेतुकस्तै
लंतिलेभ्यःप्राप्तुमिच्छति ॥ ४ ॥ कृषिःसेवावणिग्विद्यायेनयस्योपजीवितम् ॥ सुदृढंचनक
र्त्तव्यंकृष्णसर्पमुखंयथा ॥ ५ ॥ जितंकृष्यातुदारिद्र्यंगोभिरभ्यागतोजितः ॥ जिताधनवता
नारीशास्त्राभ्यासैर्जितासभा ॥ ६ ॥ वृष्टितोनास्तिदुर्भिक्षंजपतोनास्तिपातकं ॥ मौनेन
कलहोनास्तिनास्तिजागरतोभयम् ॥ ७ ॥ चिंतनीयाहिविपदामादावेवप्रतिक्रिया ॥ नकूप
खननंकार्यंप्रदीप्तेवह्निनागृहे ॥ ८ ॥ प्रारंभेसर्वकार्याणिविचार्याणिपुनःपुनः ॥ प्रारब्धस्यां

जेगजे ॥ सज्जनानहिसर्वत्र चन्दनंनवनेवने ॥ १७ ॥ पुंसामुन्मत्ताचित्तानांद्वयम
वसुखावहम् ॥ सर्वसंगनिवृत्तिर्वाविभूतिस्सर्वविस्तरा ॥ १८ ॥ वनेवनेसन्तिवनेचरा
णांनिवासयोग्यास्तरवोपिकेचित् ॥ सकोपिशाखीक्वचिदेकएवयस्याश्रयंवांछतिवारणें
द्रः ॥ १९ ॥ अर्थिप्रश्नकृतौलोके सुलभौतौगृहेगृहे ॥ दाताचोत्तरदश्चैवदुर्लभौपुरुषौ
भुवि ॥ २० ॥ स्वगुणान्परदोषांश्चवक्तुंप्रार्थयितुंपरान् ॥ याचितारंनिराकर्तुंसतां
जिह्वाजडायते ॥ २१ ॥ पातितोपिकराघातैरुत्पतत्येवकन्दुकः ॥ प्रायेणसाधुवृत्तीनाम
स्थायिन्योविपत्तयः ॥ २२ ॥ अधमाधनमिच्छंतिधनमानौहिमध्यमाः ॥ उत्तमामानमि
च्छंतिमानोहिमहतांधनम् ॥ २३ ॥ दोषोप्यस्तिगुणोप्यस्तिनिर्दोषोनैवजायते ॥ सुकोम
लस्यपद्मस्यनालेभवतिकंटकः ॥ २४ ॥ इति सज्जनपद्धतिः ॥ द्यूतंचमद्यंपिशितंचवेश्या
पापर्द्धिचौर्यंपरदारसेवा ॥ एतानिसप्तव्यसनानिलोकेघोरातिघोरंनरकंनयंति ॥ १ ॥

नश्रियस्तत्रातिष्ठंतिद्यूतंयत्रप्रवर्तते ॥ नवृक्षजातयस्तत्रविद्यतेयत्रपावकः ॥ २ ॥ इति
द्यूतम् ॥ नवेत्तिमद्यपानतःस्मरेणविह्वलीकृतः ॥ स्वमातरंचयोषितंसमानमेवमन्यते ॥ १ ॥
मद्यपानात्परंपापंनभूतंनभविष्यति ॥ मद्यत्यागात्परंपुण्यंनभूतंनभविष्याति ॥ २ ॥ इति
मद्यम् ॥ संस्कर्त्ताचोपकर्त्ताचघातकश्चैवखादकः ॥ उपदेष्टानुमंताचषडेतेसमभागिनः॥ १ ॥
शुक्रशोणितसंभूतंयेनराभुंजतेफलम् ॥ नरकान्ननिवर्ततेयावच्चंद्रदिवाकरौ ॥ २ ॥ सर्वंशु
क्रंभवेद्ब्रह्माविष्णुर्मांसंप्रवर्तते ॥ ईश्वरश्चास्थिसंघातस्तस्मान्मांसंनभक्षयेत् ॥ ३ ॥ इति
मांसम् ॥ तपोव्रतयशोविद्याकुलीनत्वंदमोवयः ॥ छिद्यंतेवेश्ययासद्यःकुठारेणलतायथा ॥ १ ॥
योवेश्यावदनंनिस्तेमूढोमद्यादिवासितम् ॥ मद्यमांसपरित्यागव्रतंतस्यकुतोभवेत् ॥ २ ॥ इति
वेश्या ॥ वधोबंधोधनभ्रंशस्तापःशोकःकुलक्षयः ॥ आयासःकलहोमृत्युर्लभ्यंतेपारदारिकैः॥ १॥
स्वाधीनेपिकलत्रे नीचःपरदारलंपटोभवति ॥ संपूर्णेपितडागेकाकःकुंभोदकंपिबति ॥ २ ॥ इति

परस्त्री ॥ मृगमीनसज्जनानांतृणजलसंतोषविहितवृत्तीनाम् ॥ लुब्धकधीवरपिशुनानिष्कारण वैरिणोजगति ॥ १ ॥ द्यूताद्धर्मसुतः पलादपिबकोमद्याद्यदोर्नंदनाश्चारुःकामुकयामृगांकग तयासव्रह्मदत्तोनृपः ॥ चौर्यत्वाच्छिवभूतिरन्यवनितादोषाद्दशास्योहठादेकैकव्यसनाद्धताइति जनाः सर्वैर्नकोनश्यति ॥ २ ॥ इति व्यसनपद्धतिः ॥ नास्तिकामसमोव्याधिर्नास्तिका मसमोरिपुः ॥ नास्तिक्रोधसमोवह्निर्नास्तिज्ञानात्परंसुखम् ॥ १ ॥ मातंगमत्स्यमधुकर पतंगसारंगकाद्योनिहताः ॥ एकैकेंद्रियवशगाःकिंपुनरखिलेन्द्रियासक्ताः ॥ २ ॥ इति विषयाः ॥ नस्थातव्यंनवक्तव्यंक्षणमप्यसतासह ॥ पयोपिशुंडिनीहस्तेवारुणीत्यभिधीय ते ॥ १ ॥ अहोभवतिसादृश्यंमृदंगस्यखलस्यच ॥ यावन्मुखगतःपिंडःतावन्मधुरभाषि णौ ॥ २ ॥ विदुषोपिहितंविराजतेनवचः श्रोतरिबोधवर्जिते ॥ तरुणेनरिनष्टलोचनेसफ लाःकिंनुकलत्रविभ्रमाः ॥ ३ ॥ अहयोबहवःसंतिभेकभक्षणतत्पराः ॥ एकएवहिशेषोयंध

हनेहेम्नच्छेदनेकर्षणेतथा ॥ इदमेवमहद्दुःखंगुंजयासहतोलनम् ॥ ७ ॥ केतकीकुसुमैर्भृंगः
खंड्यमानोपिशोभते ॥ दोषाःकिंनामकुर्वंतिगुणोपहतचेतसाम् ॥ ८ ॥ जलरेखेवनीचानांयत्कृ
तंतन्नदृश्यते ॥ अत्यल्पमपिसाधूनांशिलारेखेवदृश्यते ॥ ९ ॥ चन्दनंशीतलंलोके चन्दना
दपिचन्द्रमाः ॥ चन्दनाच्चैवचन्द्राच्चशीतलःसाधुसंगमः ॥ १० ॥ संसारकटुवृक्षस्यद्वेफलेअ
मृतोपमे ॥ सुभाषितरसास्वादः संगतिःसज्जनैःसह ॥ ११ ॥ एकोपिगुणवान्पुत्रः किंनिर्गुण
शतैरपि ॥ एकश्चन्द्रस्तमोहन्तिनचतारासहस्रकम् ॥ १२ ॥ विद्वानेवहिजानातिविद्वज्जनर
सामृतम् ॥ जंभारिरेवजानातिरम्भासंभोगजंसुखम् ॥ १३ ॥ तुष्यन्तिभोजनेविप्रामयूराघन
गर्जिते ॥ महांतःपरकल्याणेनीचाःपरविपत्तिषु ॥ १४ ॥ पठंतुचतुरोवेदान्तेनशास्त्रविशारदाः
आत्मज्ञानंनजानन्तिदर्वीपाकरसंयथा ॥ १५ ॥ उपकर्त्तुंप्रियंवक्तुंकर्त्तुंस्नेहमकृत्रिमम् ॥
सज्जनानांस्वभावोयं केनेंदुःशिशिरीकृतः ॥ १६ ॥ शैलेशैलेनमाणिक्यं मौक्तिकंनग

षुचवैराग्यंक्षिप्रमेवविनश्यति ॥ १४ ॥ गतानुगतिकोलोकोनलोकःपरमार्थिकः ॥ पश्यलो
कस्यमूर्खत्वंहारितंताम्रभाजनम् ॥ १५ ॥ लम्बतेचफलैर्वृक्षोलम्बतेचबहुश्रुतः ॥ शुष्कवृक्ष
श्चमूर्खश्चभज्यतेनचलंबते ॥ १६ ॥ शक्योवारयितुंजलेनदहनश्छत्रेणसूर्यप्रभानागेंद्रो
निशितांकुशेनसमदोदंडेनगोगर्दभौ ॥ व्याधिर्भेषजसंग्रहैश्चविविधैर्मंत्रप्रभावैर्विषंसर्वेष्वौष
धमस्तिशास्त्रविहितंमूर्खस्यनास्त्यौषधम् ॥ १७ ॥ कुलिकोयंगुणवानितिविश्वासोनहिखलेषुक
र्त्तव्यः ॥ ननुमलयचन्दनादपिसमुत्थितोग्निर्दहत्येव ॥ १८ ॥ इतिदुर्जनपद्धतिः ॥ हिते
षिणःसंतिनतेमनीषिणोमनीषिणःसंतिनतेहितैषिणः ॥ सुहृच्चविद्वानपिदुर्लभोजनेयथौषधंस्वादु
चरोगहारिच ॥ १ ॥ वृक्षंक्षीणफलंत्यजंतिविहगादग्धंवनांतंमृगामालांपर्युषितांत्यजंतिहिजनाः
शुष्कंसरःसारसाः ॥२॥निर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टंनृपंसेवकाःसर्वस्वार्थवशानरोनरमते क
स्यास्तिकोवल्लभः ॥ ३ ॥ यत्रापितत्रापिगताभवन्ति हंसामहीमंडलमंडनाय ॥ हानिस्तु

तेषांहिसरोवराणांयेषांमरालैःसहविप्रयोगाः ॥ ४ ॥ अधनंखलुजीवधनंहेमार्द्धंधनंमहाधनंधा
न्यम् ॥ अतिधनमेतत्रितयंविद्याशीलंचमित्रंच ॥५॥ अलसस्यकुतोविद्याअविद्यस्यकुतोधनम् ॥
अधनस्यकुतोमित्रममित्रस्यकुतोबलम् ॥ ६ ॥ तावद्गुणागुरुत्वंचन्नायवार्धयतेपरान्॥ अर्थीचेत्पु
रुषोजातः क्वगुणाःक्वचगौरवम् ॥७॥ सिद्धमंत्रौषधंधर्ममायुर्वित्तंचमैथुनम् ॥ कुभुक्तंकुत्सितंचैव
मतिमान्नप्रकाशयेत् ॥८॥ अधिकारश्चगर्भश्चऋणंकुक्कुरमैथुनम् ॥ प्रवेशेसुखमाप्नोतिनिर्गमेदुःख
मेवच॥९॥सूपकारंकविंवैद्यंबन्दिनंशस्त्रपाणिनम्॥स्वामिनंधनिनंमूर्खंमर्मज्ञंनप्रकोपयेत् ॥ १० ॥
अर्थपतौभूमिपतौविद्यावृद्धेतपोधिकेबहुषु ॥ मूर्खेष्वरिषुचगुरुषुविदुषानैवोत्तरंवाच्यम् ॥ ११ ॥
बुद्धिहीनानसाविद्या विद्यायाबुद्धिरुत्तमा ॥बुद्धिहीनाविनश्यन्तियथातेसिंहकारकः॥१२॥बुद्धिर्यं
स्यबलंतस्यनिर्बुद्धेस्तुकुतोबलम् ॥ वनेसिंहोमदोन्मत्तःशशकेननिपातितः॥१३॥धर्मारम्भेऋण
च्छेदे कन्यादानेधनागमे ॥ शत्रुविद्याग्निरोगेषुकालक्षेपंनकारयेत् ॥ १४ ॥ ग्रामेवासोनायको

निर्विवेकःकौटिल्यानामेवपात्रंकलत्रम् ॥ नित्यंरोगःपारवश्यंचपुंसामेतत्सर्वंजीवतामेवमृत्युः ॥
१९ ॥ इतिसंकीर्णपद्धतिः ॥ पातालमाविशतुयातुसुरेंद्रलोकमारोहतुक्षितिधराधिपतिंचमे
रुम् ॥ मंत्रौषधप्रहरणैश्चकरोतुरक्षांयद्भावितद्भवतिनात्रविचारहेतुः ॥ १ ॥ यत्प्रातःसंस्कृतं
चान्नंसायंसद्योविनश्यति ॥ तदीयरसनिष्पन्नेकायेकानामनित्यता ॥ २ ॥ अनित्यानिशरी
राणिविभवोनैवशाश्वतः ॥ नित्यंसान्निहितोमृत्युःकर्त्तव्योधर्मसंग्रहः ॥ ३ ॥ स्फटिकस्यगुणोयो
सौसएवायातिदोषताम् ॥ आश्रयादयमात्मातुनिर्मलोपिमलीनताम् ॥४॥ अव्याधिनाशरीरेणम
नसाचनिराधिना ॥ पूरयन्नर्थिनामाशांत्वंजीवशरदांशतम् ॥ ५ ॥ येपठंतिनरानित्यंयेशृण्वन्ति
चतत्वतः ॥ प्राप्नुवंतिशिवंलोकंशिवांसूक्तावलीमिमाम् ॥ ६ ॥ इति सूक्तावलीसमाप्ता ॥

रणीधरणक्षमः ॥ ४ ॥ असूयुःपिशुनश्चैवकृतघ्नोदीर्घरोषणः ॥ चत्वारःकर्मचंडालाजाति
चंडालपंचमाः ॥ ५ ॥ सर्पःक्रूरःखलःक्रूरःसर्पात्क्रूरतरःखलः ॥ मंत्रौषधैर्वशः सर्पःखलः
केनोपशाम्याति ॥ ६ ॥ नहिसंसर्गदोषेणसाधवोयांतिविक्रियाम् ॥ भुजंगैर्वेष्ट्यमानोपिचंद
नोनविषायते ॥ ७ ॥ उपकारोपिनीचानांप्रकोपायनशांतये ॥ पयः पानंभुजंगानांकेवलं
विषवर्धनम् ॥ ८ ॥ द्विहस्तश्चद्विपादश्चदृश्यसेमानुषाकृतिः ॥ शीतवातविघातायगृहंकिं
नकरोषिभो ॥ ९ ॥ सूचीमुखेदुराचारेरंडेपंडितमानिनि ॥ असमर्थोगृहारंभेसमर्थो
गृहभंजने ॥ १० ॥ उपदेशोनदातव्योयादृशेतादृशेनरे ॥ चटिकाकपिमूर्खेणस्वगृहा
न्निर्गृहाकृता ॥ ११ ॥ यन्मुखंशास्त्रविभ्रष्टंतांबूलरसवर्जितम् ॥ सुभाषितपरित्यक्तं
छिद्रमेवहिकेवलम् ॥ ११ ॥ गुणैरुत्तुंगतांयातिनचोच्चासनसंस्थितः ॥ प्रासादशि
खरस्थोपिकाकःकिंगरुडायते ॥ १२ ॥ अभ्रच्छायातृणाग्निश्चपराधीनंचयत्सुखम् ॥ अज्ञाने

# काव्यग्रन्थाः ।

| नाम. | की. रु. आ. |
|---|---|
| गीतगोविन्दमूल ... ... ... ... | ०—३ |
| गीतगोविन्द राधाविनोद सहित संस्कृतटीका और भाषाटीका ... ... ... | १—० |
| भामिनीविलासमूल ... ... ... | ०—४ |
| भामिनीविलास महावीरप्रसादकृतभा.टीका | १—० |
| माघकाव्य (शिशुपालवध) सटीकसंपूर्ण | २—८ |
| किरातार्जुनीयकाव्य सटीक ... | २—० |
| भर्तृहरिशतकत्रयसंस्कृतटीका और भाषा टीका ग्लेजकागज ... ... ... | १—२ |
| अमरुशतक (शृंगार और वेदान्तपर टीका समेत) ... ... ... ... | ०—१० |
| भोजप्रबंध मूल (राजनीति) ... ... | ०—७ |
| भोजप्रबन्ध भाषाटीका... ... ... | १—४ |
| भोजप्रबन्ध भाषा ... ... ... | ०—८ |

| नाम | की. रु. आ. |
|---|---|
| रघुवंश मल्लिनाथकृत संजीवनी टीका और टिप्पणी सहित जिल्द बँधा ... | १–८ |
| ” तथा रफ कागज | १–४ |
| ” सादी जिल्दका | १–० |
| रघुवंश भाषाटीका पद योजना तात्पर्यार्थ और सरलार्थ सहित ... ... | ३–८ |
| कुमारसंभव सटीक ... ... ... | १–४ |
| मेघदूत सान्वय मल्लिनाथी टीका और भाषाटीका सहित ... ... ... | ०–८ |

| नाम. | की. रु. आ. |
|---|---|
| दशकुमारचरित्र सटीक ... ... | १–८ |
| राक्षसकाव्यसंस्कृतटीकाऔरभाषाटीका सहित ... ... ... ... | ०–२ |
| हितोपदेशमूल ... ... ... ... | ०–८ |
| हितोपदेशभाषाटीका ... ... ... | १–४ |
| रामकृष्णविलोमकाव्य ... ... ... | ०–४ |
| गंगालहरीअन्वयार्थ भाषाटीका सहित | ०–४ |
| कृष्णकर्णामृत .. .. .. | ०–५ |
| शृंगारतिलक भाषाटीका सहित .. | ०–४ |

| नाम. | की. रु. आ. |
|---|---|
| राधाविनोद भाषाटीका .. .. | ०—२ |
| रंभाशुकसंवाद संस्कृत मूल व प्रत्येक श्लोकका कवित्तमें टीका व भाषाटीका सहित .. .. .. .. | ०—२ |
| शृंगारादिनवरस निरूपण भाषाटीका-( शृङ्गारका अतीव चमत्कारी ग्रन्थ ) .. | ०—६ |
| पद्यावलीअनेकमहानुभावोंके संगृहीतश्लोक | ०—८ |
| सटिप्पणीक कविरहस्यम् .. .. | ०—६ |

| नाम. | की. रु. आ. |
|---|---|
| राधाविनोद भाषाटीका .. .. | ०—२ |
| शांकरदिग्विजय सटीक .. .. | |
| मध्वविजय .. .. .. .. | ०—१२ |
| कृष्णामृततरंगिका सटीक .. | ०—५ |
| विद्यासुन्दर और चौरपंचाशिका भाषाटीकासहित .. .. .. | ०—५ |
| कलिविडंबन भाषाटीकासह .. .. | ०—४ |
| सौन्दर्यलहरी सटिप्पण .. .. | ०—३ |

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना, खेतवाड़ी—बंबई.

इदं पुस्तकं मुंबय्यां श्रीकृष्णदासात्मजखेमराजेन स्वकीये
"श्रीवेंकटेश्वराख्य" मुद्रणयंत्रालये मुद्रितम्
शके १८१८ सं. १९५३

॥ इति सूक्तावलिः समाप्ता ॥

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 25711
Date 9.8.68

# राजनीतिकी जाहिरात।

| नाम. | की. रु. आ. |
|---|---|
| शुक्रनीति भाषाटीकासहित ( राजप्रबन्ध नीति ) ... ... ... ... | १--८ |
| भर्तृहरिशतक भाषाटीका ( नीति, शृंगार, वैराग्य ) ... .... ... ... | १--० |
| चाणक्यनीति भाषाटीका दोहासहित जिल्द | ०--८ |
| विदुरनीतिहिंदुस्थानी श्रीमहाराज धृतराष्ट्र--को विदुरने उपदेश दियाहै यक्षप्रश्नोंकेसह | ०--४ |
| विदुरप्रजागरराजनीति मारवाडीभाषा... | ०--८ |
| राजनीति पंचोपाख्यान भाषा... ... | ०--७ |
| कुण्डलिया गिरधररायकृत ( सामयिक नीति वेदान्त संयुक्त ) ... ... .. | ०--४ |

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना-मुंबई.